विकीर्य्यमाणान् खद्योतैर्वृक्षांस्तेजोभि चैव हि ॥
विकीर्य्यमाणान् पश्यमानान् अम्बुधारादिभिरिव ॥
वातादिजनितैर्नेत्रवर्णैरपि स षड्विधः ।
लिङ्गनाशो निगदितो वर्णो वातादितो यथा ॥

रागारुणो मारुततः प्रदिष्टो
म्लायी च नीलश्च तथैव पित्तात् ।
कफात् सितः शोणिततः सरक्तः
समस्तदोषप्रभवो विचित्रः ॥ * ॥

वातादिना हेतुभूतेन जनिते नेत्रविषये मण्डले रूपविशेषमाह ।

अरुणं मण्डलं वाताच्चलं परुषं तथा ।
पित्ततो मण्डलं नीलं कांस्याभं वा सपीतकम् ॥
श्वेतं पीतं वा कथमेतत् व्याधिप्रभावात् ॥
श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डरम् ।
चलत्पद्मपलाशस्थशुक्लो बिन्दुरिवाम्भसः ।
मृद्यमाने तु नयने मण्डलं तद्विसर्पति ॥
बहलं स्थूलम् ।
मण्डलं तु भवेच्चित्रं लिङ्गनाशे त्रिदोषजे ।
प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् ॥
चित्रं वातादिवर्णम् ।
रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम् ।
परिम्लायिनि रोगे स्यात् म्लानं नीलमथापि वा ॥
दोषक्षयात् स्वयं तत्र कदाचित् स्यात्तु दर्शनम् ॥

रक्तजं पित्तानुगामिरक्तजम् । स्थूलकाचारुणप्रभं स्थूलकाचस्येवारुणा प्रभा यस्य तत् । एतेन स्थौल्यमरुणत्वञ्च बोध्यते । दोषक्षयादित्यादि । तत्र परिम्लायिनि कालान्तरेण दोषक्षयात् कदाचित् स्वयमेव दर्शनं स्यात् ॥ * ॥ अनुक्त-व्यथादाहगौरवादिदोषलिङ्ग-संग्रहणार्थमाह ।
यथास्वं दोषलिङ्गानि सर्व्वेष्वेव भवन्ति हि ॥*॥
पित्तविदग्धदृष्टेर्लक्षणमाह ।

पित्तेन दुष्टेन गतेन दृष्टिं
पीता भवेद्यस्य नरस्य दृष्टिः ।
पीतानि रूपाणि च तेन पश्येत्
सर्व्वो नरः पित्तविदग्धदृष्टिः ॥

पित्तेन गतेन दृष्टिं दृष्टावपि प्रथमद्वितीये पटले गतेनेति बोद्धव्यम् । तेन व्याधिना ॥ * ॥ तस्मिन्नेव पित्ते दृष्टौ तृतीयं पटलं गते रूपविशेषमाह ।

प्राप्ते तृतीयं पटलं तु दोषे
दिवा न पश्येन्निशि वीक्षते सः ।
रात्रौ स शीतानुगृहीतदृष्टिः
पित्ताल्पभावात् सकलानि पश्येत् ॥

दोषेऽत्र पित्ते ॥ * ॥ अथ श्लेष्मविदग्धदृष्टिलक्षणमाह ।

तथा नरः श्लेष्मविदग्धदृष्टि-
स्तान्येव शुक्लानि हि मन्यते तु ।

अत्रापि श्लेष्मणो दृष्टौ प्रथमद्वितीयपटलगतस्वे-तल्लिङ्गं बोद्धव्यम् ॥ * ॥ स एव श्लेष्मा दृष्टौ पटलत्रयं गतो नक्तान्ध्यं करोतीत्याह ।

त्रिषु स्थितो यः पटलेषु दोषो
नक्तान्ध्यमापादयति प्रसह्य ।
दिवा स सूर्य्यानुगृहीतदृष्टिः
पश्येत्तु रूपाणि कफाल्पभावात् ॥

दोषोऽत्र कफस्तस्योपक्रान्तत्वात् । नक्तान्ध्यस्य श्लेष्मविदग्धदृष्टावन्तर्भूतत्वाच्च पृथग्गणना ॥*॥
धूमदर्शिनमाह ।

शोकज्वरायासशिरोऽभितापै-
रभ्याहता यस्य नरस्य दृष्टिः ।
धूम्रांस्तु यः पश्यति सर्व्वभावान्
स धूमदर्शीति नरः प्रदिष्टः ॥

शिरोऽभितापः शिरसि घर्म्मादिना सन्तापः ।
एतस्य पित्तदोषो बोद्धव्यः ॥ * ॥
ह्रस्वजात्यमाह ।

यो वासरे पश्यति कष्टतोऽथ
रूपं महच्चापि निरीक्षतेऽल्पम् ।
रात्रौ पुनर्यः प्रकृतानि पश्येत्
स ह्रस्वजात्यो मुनिभिः प्रदिष्टः ॥ * ॥

नकुलान्ध्यमाह ।

विद्योतते यस्य नरस्य दृष्टि-
र्दोषाभिपन्ना नकुलस्य यद्वत् ।
चित्राणि रूपाणि दिवा स पश्येत्
स वै विकारो नकुलान्ध्यसंज्ञः ॥ * ॥

गम्भीरकमाह ।

दृष्टिर्व्विरूपा श्वसनोपसृष्टा
सङ्कुच्य याभ्यन्तरतः प्रयाति ।
रुजावगाढ़ा च तमक्षिरोगं
गम्भीरकेति प्रवदन्ति तज्ज्ञाः ॥

विरूपा विकृता । श्वसनोपसृष्टा वातोपहता ।
रुजावगाढ़ा गम्भीरवेदनान्विता ॥ * ॥

बाह्यौ पुनर्द्वावपि संप्रदिष्टौ
निमित्ततश्चाप्यनिमित्ततश्च ।
निमित्ततस्तत्र शिरोऽभितापात्
ज्ञेयस्त्वभिष्यन्दनिदर्शनैः सः ॥

बाह्यौ सुश्रुतोक्तद्वादशसंख्येभ्योऽधिकौ तत्र निमित्तत आह शिरोऽभितापात् शिरोऽभिताप्यते येन विषकुसुमगन्धवहपवनस्पर्शेन स शिरोऽभितापस्तस्मात् । अभिष्यन्दनिदर्शनैः रक्ताभिष्यन्दलिङ्गैरिति गदाधरः ॥ सन्निपाताभिष्यन्दलिङ्गैरिति कार्त्तिकः ॥ * ॥
अनिमित्तत आह ।

सुरर्षिगन्धर्व्वमहोरगाणां
सन्दर्शनेनापि च भास्करस्य ।
हन्येत दृष्टिर्मनुजस्य तस्य
स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥

अनुपलभ्यमानानां सुरादीनां दर्शननिमित्तमप्यनिमित्तं मन्यते ॥ * ॥
अनिमित्ततो लिङ्गनाशस्य लक्षणमाह ।

तत्राक्षिविस्पष्टमिवावभाति
वैदूर्य्यवर्णा विमला च दृष्टिः ।

विस्पष्टं ज्योतिर्युक्तम् । वैदूर्य्यवर्णा श्यामा विमला निर्म्मला । इति दृष्टिरोगाः ॥ * ॥
अथ तिमिरचिकित्सा ।
"शङ्खं पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥*॥
शङ्खनाभिर्विभीतस्य पथ्यामज्जा मनःशिला ।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥
छागीक्षीरेण संपिष्य वर्त्तीं कुर्य्याद्यवोन्मिताम् ।
हरेणुमात्रां संघृष्य जलेनाञ्जनमाचरेत् ॥
तिमिरं मांसवृद्धिञ्च काचं पटलमर्ब्बुदम् ।
रात्र्यान्ध्यं वार्षिकं पुष्पं वटी चन्द्रोदया हरेत् ॥"
इति चन्द्रोदया वटी ॥ * ॥

कणा सलवणोषणा सहरसाञ्जना साञ्जना
सरित्पतिकफः सिता सितपुनर्नवा सम्भवा ।
रजन्यरुणचन्दनं मधु च तुल्यपथ्याशिला
अरिष्टदलसावरस्फुटिकशङ्खनाभीन्दवः ॥
इमानि तु विचूर्णयेन्निविड़वाससा शोधये-
त्तथायसि विमर्द्दयेत् समधुताम्रखण्डेन तत् ।
इदं मुनिभिरीरितं नयनशोधनामाञ्जनं
करोति तिमिरत्रयं पटलपुष्पनाशं बलात् ॥

लवणं सैन्धवम् । अञ्जनं सुरमा इति लोके । सरित्पतिकफः समुद्रफेनः । शिला मनःशिला । सावरो लोध्रः । स्फुटिकः पट्करी । इन्दुः कर्पूरः । नयनशोधं तिमिरे नूतनकुसुमे नूतनपटले च ॥ * ॥

हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च शङ्खनाभिर्म्मनःशिला ॥
सर्व्वमेतत् समं कृत्वा गव्यक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कण्डुं पटलान्यर्ब्बुदानि च ॥
अपि त्रैवार्षिकं शुक्रं मासेनैकेन नाशयेत् ।
अधिकानि च मांसानि रात्र्यान्ध्यत्वमेव च ॥
चन्द्रोदया वटी पुष्पे तिमिरे च ॥ * ॥
रजनी निम्बपत्राणि पिप्पली मरिचानि च ।
विड़ङ्गं भद्रमुस्तञ्च सप्तमी त्वभया स्मृता ॥
अजामूत्रेण संपिष्य छायायां शोषयेद्वटीम् ।
वारिणा तिमिरं हन्ति गोमूत्रेण तु पिच्छिकाम् ॥
मधुना पटलं हन्ति नारीक्षीरेण पुष्पकम् ।
एषा चन्द्रप्रभावर्त्तिः स्वयं रुद्रेण निर्म्मिता ॥
इति चन्द्रप्रभावर्त्तिः ॥ * ॥
कणा छागशकृन्मध्ये पक्वा तद्रसपेषिता ।
अचिराद्धन्ति नक्तान्ध्यं तद्वत् सक्षौद्रमूषणम् ॥
त्रिफलाया रसं प्रस्थं प्रस्थं भृङ्गरजस्य च ।
वृषस्य च रसं प्रस्थं शतावर्य्याश्च तत्समम् ॥
गुडूच्या आमलक्याश्च रसं छागीपयस्तथा ।
प्रस्थं प्रस्थं समाहृत्य सर्व्वैरेभिर्घृतं पचेत् ॥
कल्कः कणा सिता द्राक्षा त्रिफला नीलमुत्पलम् ।
मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका ॥
तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् ।
ऊर्द्ध्वं पानमधःपानं मध्ये पानं प्रशस्यते ॥
यावन्तो नेत्रजा रोगास्तान् पानादपकर्षति ।
सुरक्ते रक्तदुष्टे च रक्ते वा विश्रुते तथा ॥
नक्तान्ध्ये तिमिरे काचे नीलिका पटलार्ब्बुदे ।
अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे ॥
नेत्ररोगेषु सर्व्वेषु दोषत्रयकृतेष्वपि ।
परं हितमिदं प्रोक्तं त्रिफलाद्यं महाघृतम् ॥